## केन्द्रीय-विद्यालय–संघटनम् ,तिनसुकिया - संभागः

**सत्रान्त परीक्षा – 2018 – 19**

**विषयः – संस्कृतम्**

**कक्षा – अष्टमी**

**समयः – सार्धहोराद्वयम्** **पूर्णाकाः – 80**

**छात्राणां कृते**

**छात्रस्य नाम** ---------------------------------------------------------------------------------------------------------------

**कक्षा** --------------------------------- **वर्गः** ---------------------------**अनुक्रमाङ्कः ( अङ्केषु )** ----------------------

**अनुक्रमाङ्कः (शब्देषु )** ------------------**दिनाङ्कः** ------------------ **दिवसः** ------------------------------------------

**निरीक्षकस्य हस्ताक्षरम्** ---------------------------------------------**परीक्षकस्य हस्ताक्षरम्** ----------------------

परीक्षकस्य कृते

| क | ख | ग | घ | योगः |
|---|---|---|---|---|
| | | | | |
| 10 | 15 | 25 | 30 | 80 |

निर्देशा :--

( 1).-अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति –

खण्डः – क - अपठित – अवबोधनम् - 10 अङ्काः

खण्डः – ख – रचनात्मकं – लेखनम् - 15 अङ्काः

खण्डः – ग – अनुप्रयुक्त – व्याकरणम् - 25 अङ्काः

खण्डः – घ – पठित- अवबोधनम् - 30 अङ्काः

( 2 ) उत्तराणि अस्यामेव पुस्तिकायां निर्दिष्टस्थाने लेखितव्यानि |

( 3 ) अन्यत्र कुत्रापि लिखितेभ्यः अङ्काः न प्रदास्यन्ते |

( 4 ) समस्ताः प्रश्नाः अनिवार्याः सन्ति |

**खण्डः – क**

**(अपठित – अवबोधनम् -10 अङ्काः)**

**1 – अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत - 10**

व्याघ्र: अस्माकं राष्ट्र-पशु:| अतीव मनोहरः अयम्| अस्य शरीरे पीत-कृष्ण वर्णाः पङ्क्तयः नितरां शोभन्ते| कदाचित् अयं सघनेषु वनेषु निर्भयं विहरति स्म| हन्त! साम्प्रतम् व्याघ्राणां संख्या अत्यल्पा जाता| व्याघ्र-जातिं सर्वनाशात् रक्षितुं वन-

पर्यावरण-मन्त्रालयःअनेकान् उपायान् करोति, परं सर्वे प्रयत्नाः निष्फलाः भवन्ति| कारणं किम्? केषाञ्चित् धूर्तानां लोभः अथ वा वनानां छेदनम्| अस्माकं वन-संपतिः रक्षितव्या, देशस्य राष्ट्रपशुः चापि रक्षणीयः|
“प्रयोजना-व्याघ्रः”(project Tiger) सफलः भवेत्| अन्यथा भविष्यत्-काले वयं पुस्तकेषु अस्य चित्रमेव द्रक्ष्यामः|

**एक पदेन उत्तरत –**

क. अस्माकं राष्ट्रपशुः कः ?
उत्तरम्.................................................................................................................................

ख. केषां संख्या अत्यल्पा जाता?
उत्तरम्..........................................................................................................................

ग. अस्माकं का रक्षितव्या?
उत्तरम्...................................................................................................................................

**पूर्ण वाक्येन उत्तरत –**

क. व्याघ्रः कुत्र निर्भयं विहरति स्म ?
उत्तरम्.......................................................................................................................................
..................................................................................................................................................

ख. वन-पर्यावरण-मन्त्रालयः किमर्थम् उपायं करोति?
उत्तरम्.......................................................................................................................................
.....................................................................................................................................................

**भाषिककार्यम् -**

(क) ‘देशस्य‘ पदे विभक्तिः का?
अ. प्रथमा  ब. षष्ठी  स. चतुर्थी  द. सप्तमी  (  )

(ख) “सफलाः” पदस्य विलोमपदं किम्?
अ. निष्फलाः  ब.पूर्णसफलाः  स. फलाः  द. सफलतमाः  (  )

(ग) ‘रक्षितुम्’ अत्र कः प्रत्ययः?
अ. क्त्वा  ब. तुमुन्  स. ल्यप्  द. क्तवतु  (  )

**(खण्ड – ख – रचात्मकलेखनम् )**

**प्रश्न 2. चित्रं दृष्ट्वा उचितपदैः वाक्यपूर्तिं कुरुत-** **5**



| | | | | |
|---|---|---|---|---|
| **अस्त्राणां** | **भवति** | **अस्त्राणि** | **प्रयोगः** | **उपग्रहाणाम्** |

1. अस्मिन् चित्रे ....................................दृश्यन्ते|
2. एतेषाम् अस्त्राणां............................ युद्धे भवति|
3. भारतः एतादृशानां ..............................प्रयोगेण विकसितदेशः मन्यते|
4. अत्र परमाणुशक्तिप्रयोगः.............................. |
5.................................... सहायतया बहूनि कार्याणि भवन्ति|

**प्रश्न 3. अधोलिखितानि पदानि प्रयुज्य वाक्यानि रचयत – 10**

(क) विद्या -...........................................................................................................
(ख) तपः -...........................................................................................................
(ग) नित्यम् -...........................................................................................................
(घ) परितोषः -...........................................................................................................
(ङ) समाचरेत् -...........................................................................................................

**(खण्ड – ग – अनुप्रयुक्तव्याकरणम्)**

**प्रश्न 4. मन्जूषात: चित्वा उचिताव्ययपदेन वाक्यपूर्तिं कुरुत- 5**

| | | | | |
|---|---|---|---|---|
| **तावत्** | **अपि** | **एव** | **यथा** | **नित्यम्** |

(क) तयोः ..........................प्रियं कुर्यात्|
(ख) वर्षशतैः ............................निष्कृतिः न कर्तुं शक्या|
(ग) तेषु ............................ त्रिषु तुष्टेषु तपः समाप्यते|
(घ) .................................राजा तथा प्रजा|
(ङ) यावत् सफलः न भवति ...............................परिश्रमं कुरु|

**प्रश्न 5. अधोलिखितपदेषु यथापेक्षितं संधि/विच्छेदं कुरुत— 5**

| | | | | |
|---|---|---|---|---|
| (क) विनयोपेता | = | विनय | + | ............................ |
| (ख) कुसुमादपि | = | ............................ | + | अपि |
| (ग) चिनोम्युभयम् | = | चिनोमि | + | ............................ |
| (घ) नृत्यैर्मुग्धम् | = | ............................ | + | मुग्धम् |
| (ङ) प्रकृतिरस्ति | = | प्रकृतिः | + | ............................ |

**प्रश्न 6. " मति " शब्दस्य रूपाणि पूरयत- 5**

| | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| **प्रथमा** | मतिः | मती | मतयः |
| **द्वितीया** | मतिम् | ............................ | मतीः |
| **तृतीया** | मत्या | मतिभ्याम् | ............................ |
| **चतुर्थी** | मत्यैः | मतिभ्याम् | मतिभ्यः |
| **पञ्चमी** | मत्याः, मतेः | ............................ | ............................ |
| **षष्ठी** | ............................ | मत्योः | मतीनाम् |
| **सप्तमी** | मत्याम् | मत्योः | मतिषु |
| **संबोधनम्** | हे मते! | हे मती! | हे मतय:! |

**प्रश्न 7. अधोलिखितपदेषु प्रकृति-प्रत्ययविभागं कुरुत–** **5**

| **पदानि** | | **प्रकृति** | | **प्रत्यय** |
|---|---|---|---|---|
| यथा- गन्तुम् | = | गम् | + | तुमुन् |
| (क) ज्ञातुम् | =...................... | | + ........................... | |
| (ख) ग्रहीतुम् | =...................... | | + ............................ | |
| (ग) पातुम् | =...................... | | + ........................... | |
| (घ) श्रोतुम् | =...................... | | + ........................... | |
| (ङ) भ्रमितुम् | =...................... | | + ........................... | |

**प्रश्न 8. विशेषण-विशेष्य पदानि योजयत–** **5**

| **क** | **ख** | |
|---|---|---|
| (क) सुकुमारा | जगत् | ................................. |
| (ख) सहजा | संसारे | .................................. |
| (ग) विश्वस्मिन् | भारतजनता | .................................. |
| (घ) समम् | प्रकृति | .................................... |
| (ङ) समस्ते | जगति | .................................... |

**(खण्ड - घ – पठितावबोधनम् )**

**प्रश्न 9. अधोलिखितम् अनुच्छेदम् पठित्वा प्रश्नान् उत्तरत –** **5**

जनवरी मासस्य तृतीये दिवसे 1831 तमे ख्रिस्ताब्दे महाराष्ट्रस्य नायगाँव-नाम्नि स्थाने सावित्री अजायत। तस्याः माता लक्ष्मीबाई पिता च खन्डोजि इति अभिहितौ| नववर्षदेशीया सा ज्योतिबा फुले महोदयेन परिणीता| सोSपि तदानीं त्रयोदशवर्षकल्पः एव आसीत्| यतोहि सः स्त्रीशिक्षायाः प्रबलः समर्थकः आसीत्अतः सावित्र्याः मनसि स्थिता अध्ययनाभिलाषा उत्सं प्राप्तवती| इतः परं सा साग्रहम् आङ्ग्लभाषाया अपि अध्ययनं कृतवती|1848 तमे ख्रिस्ताब्दे पुणे नगरे सावित्री ज्योतिबामहोदयेन सह कन्यानां कृते प्रदेशस्य प्रथमं विद्यालयम् आरभत|

एकपदेन उत्तरत –

(क) सावित्री केन सह परिणीता?

उत्तरम्.......................................................................................................................

(ख) तस्याः मातापितरौ कौ आसीत् ?

उत्तरम्.......................................................................................................................

पूर्णवाक्येन उत्तरत –

(क) सावित्री प्रदेशस्य प्रथमं विद्यालयं कदा आरभत?

उत्तरम्.......................................................................................................................

..................................................................................................................................

भाषिक कार्यम्

(क) ‘महोदयेन’ इति शब्दे का विभक्ति ?

(क) प्रथमा (ख) तृतीया (ग) पञ्चमी (घ) सप्तमी ( )

**प्रश्न 10. अधोलिखितम् संवादं पठित्वा प्रश्नान् उत्तरत –** **5**

**अध्यापिका-** अष्टद्वयं मत्रयं चैव न-त्रि-युक्तं तथा द्वयम्|
सप्तराज्यसमूहोऽयं भगिनीसप्तकं मतम्||
इत्थं भगिनीसप्तके इमानि राज्यानि सन्ति-अरुणाचलप्रदेशः, असमः, मणिपुरम्, मिजोरमः, मेघालयः, नगालैंडः, त्रिपुरा चेति| यद्यपि क्षेत्रपरिमाणैः इमानि लघूनि वर्तन्ते तथापि गुणगौरवदृष्ट्या बृहत्तराणि प्रतीयन्ते|

**सर्वे-** कथम्? कथम्?

**अध्यापिका-** इमाः सप्तभगिन्यः स्वीये प्राचीनेतिहासे प्रायः स्वाधीनाः एव दृष्टाः| न केनापि शासकेन इमाः स्वायत्तीकृताः|

**स्वरा-** अन्यत् किमपि वैशिष्ट्यमस्ति एतेषाम्?

**अध्यापिका-** नूनम् अस्ति एव| पर्वत-वृक्ष-पुष्प-प्रभृतिभिः प्राकृतिकसंपद्भिः सुसमृद्धानि सन्ति इमानि राज्यानि| भारतवृक्षे च पुष्प-स्तबकसदृशानि विराजन्ते एतानि|

**एकपदेन उत्तरत –**

(क) ‘ अद्वयं ’ अत्र द्वे राज्ये के स्तः ?

उत्तरम्.......................................................................................................................................

(ख) प्राचीनेतिहासे के स्वाधीनाः एव दृष्टाः ?

उत्तरम्.......................................................................................................................................

**पूर्णवाक्येन उत्तरत –**

(क) भगिनीसप्तके कानि राज्यानि सन्ति?

उत्तरम्.......................................................................................................................................

.......................................................................................................................................

**भाषिक कार्यम् -**

(क) ‘भारतवृक्षे’ इतिपदे का विभक्तिः ?

(क) प्रथमा (ख) तृतीया (ग) पञ्चमी (घ) सप्तमी ( )

**प्रश्न 11. अधोलिखितम् श्लोकं पठित्वा प्रश्नान् उत्तरत –** **5**

**अभिवादनशीलस्य नित्यं वृद्धोपसेविनः |**
**चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ||**
**सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् |**
**एतत्विद्यात्समासेन लक्षणं सुखदुःखयोः ||**

**एकपदेन उत्तरत –**

(क) कस्य चत्वारि वर्धन्ते ?

उत्तरम्.......................................................................................................................................

(ख) दुःखं किम् ?

उत्तरम्.......................................................................................................................................

**पूर्णवाक्येन उत्तरत –**

(क) सुखदुःखयोः लक्षणं किम्?

उत्तरम्.......................................................................................................................................

.......................................................................................................................................

**भाषिक कार्यम्-**

(क)'समासेन' इतिपदे का विभक्तिः ?

(क) प्रथमा (ख) तृतीया (ग) पञ्चमी (घ) सप्तमी ( )

**प्रश्न 12. समानार्थकपदानि मेलयत-** **5**

| क | ख | |
|---|---|---|
| 1. जगति | नदी | ............................. |
| 2. कुलिशात् | संसारे | ............................. |
| 3. प्रकृति | नेत्रेण | ............................. |
| 4. चक्षुषा | स्वभावः | ................................ |
| 5. तटिनी | वज्रात् | ................................ |

**प्रश्न 13. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत-** **5**

(क) सुरक्षाप्रबन्धनस्य दायित्वं गजधराः निभालयन्ति स्म|
उत्तरम्.......................................................................................................

(ख) तेषां स्वामिनः असमर्थाः सन्ति|
उत्तरम्.......................................................................................................

(ग) कार्यसमाप्तौ वेतनानि अतिरिच्य सम्मानमपि प्राप्नुवन्ति|
उत्तरम्.......................................................................................................

(घ) गजधरः सुन्दरः शब्दः अस्ति|
उत्तरम्.......................................................................................................

(ङ) तडागाः संसारसागराः कथ्यन्ते|
उत्तरम्.......................................................................................................

**प्रश्न 14. अधोलिखितानां पदानां विपरीतार्थकपदानि लिखत–** **5**

1. उपरि =....................................
2. आदानम् =....................................
3. परकीयम् =....................................
4. आरोहः =....................................
5. विषमता =...................................

**॥इतिश्री ॥**